# ।। राजयोग श्लोक संग्रहः ।।

यं  ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैः
वेदैः साङ्गपदक्रमोपनिषदैर् गायन्ति यं सामगाः
ध्यानावस्थित तद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः।।   ( गीत ध्यानम् )

श्री भगवानुवाच

१. उद्धरेदात्मनात्मानं नात्यानमवसादयेत् |
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ||६.४||
२. बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः |
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्  ||६.६||
३.शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः  |
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ||६.११||
४.अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे |
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः |४.३१||
५.युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु |
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ||६.१७||
६.तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः |
उपविश्यासने युञ्जयाद्योगमात्मविशुद्धये ||६.१२||
७. समं कायशिरोग्रीवं धारयन् अचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ||६.१३|
८.शनैः शनैरुपरमेत् बुद्ध्या धृतिगृहीतया |
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ||६.२५||
९.प्रशान्तात्मा विगतभीः ब्रह्मचारिव्रते स्थितः |
मनः संयम्य मच्चित्तः युक्त आसीत मत्परः ||६.१४||

**अर्जुन उवाच**

१०.चञ्च लं हि मनः कृष्ण प्रमाथि बलवद् दृढम |

तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ||६.३४||

**श्रीभगवानुवाच**

११. असंशयं महाबाहो मनो दुर्निग्रहं चलम् |

अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ||६.३५||

१२. आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन |

सुखं वा यदि वा दुःखं स योगी परमो मतः ||६.३२||

१३. सुखमात्यन्तिकं यत्तत् बुद्धिग्राह्यमतीन्द्रियम् |

वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः ||६.२१|

१४. युज्जन्नेवं सदात्मानं योगी विगतकल्मषः|

सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ||६.२८||

१५.प्रयाणकाले मनसाऽचलेन

भक्त्या युक्तो योगबलेन चैव |

भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्

स तं परं पुरुषमुपैति दिव्यम् ||८.१०||

१६.प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् |

उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ||६.२८||

१७.प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः|

अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ||६.४५||

१८. योन्तः सुखोऽन्तरारामस्तथाऽन्तथाज्योतिरेव यः |

स योगी ब्रह्मनिर्वाणं ब्रह्मभुतोधिगच्छति ||५.२१||

ॐ तत् सत् इति

श्रीमदभगवदगीतासु उपनिषत्सु

ब्रह्मविद्यायां योगशास्त्रे

श्रीकृष्णार्जुनसंवादे राजयोगश्लोकसंग्रहः|

हरिः ॐ तत् सत् |